श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टचत्वारिंशः सर्गः ॥

## सीतायाः सदुःखं वचनं श्रीरामं प्रति तस्याः सन्देशो लक्ष्मणस्य गमनं सीताया विलापश्च

लक्ष्मणस्य वचः श्रुत्वा दारुणं जनकात्मजा।
परं विषादमागम्य वैदेही निपपात ह ॥ **7.48.1** ॥

सा मुहूर्तमिवासंज्ञा बाष्पपर्याकुलेक्षणा।
लक्ष्मणं दीनया वाचा उवाच जनकात्मजा ॥ **7.48.2** ॥

मामिकेयं तनुर्नूनं सृष्टा दुःखाय लक्ष्मण।
धात्रा यस्यास्तथा मेऽद्य दुःखमूर्तिः प्रदृश्यते ॥ **7.48.3** ॥

किं नु पापं कृतं पूर्वं को वा दारैर्वियोजितः।
याहं शुद्धसमाचारा त्यक्ता नृपतिना सती ॥ **7.48.4** ॥

पुराहमाश्रमे वासं रामपादानुवर्तिनी।
अनुरुध्यापि सौमित्रे दुःखे च परिवर्तिनी ॥ **7.48.5** ॥

सा कथं ह्याश्रमे सौम्य वत्स्यामि विजनीकृता।
आख्यास्यामि च कस्याहं दुःखं दुःखपरायणा ॥ **7.48.6** ॥

किं नु वक्ष्यामि मुनिषु कर्म चासत्कृतं प्रभो।
कस्मिन् वा कारणे त्यक्ता राघवेण महात्मना ॥ **7.48.7** ॥

न खल्वद्यैव सौमित्रे जीवितं जाह्नवीजले।
त्यजेयं राजवंशस्तु भर्तुर्मे परिहास्यते॥ **7.48.8** ॥

यथाज्ञं कुरु सौमित्रे त्यज्य मां दुःखभागिनीम्।
निदेशे स्थीयतां राज्ञः शृणु चेदं वचो मम॥ **7.48.9** ॥

श्वश्रूणामविशेषेण प्राञ्जलिप्रग्रहेण च।
शिरसा वन्द्य चरणौ कुशलं ब्रूहि पार्थिवम्॥ **7.48.10** ॥

शिरसाभिनतो ब्रूयाः सर्वासामेव लक्ष्मण।
वक्तव्यश्चापि नृपतिधर्मेषु सुसमाहितः॥ **7.48.11** ॥

जानासि च यथा शुद्धा सीता तत्त्वेन राघव।
भक्त्या च परया युक्ता हिता च तव नित्यशः॥ **7.48.12** ॥

अहं त्यक्ता च ते वीर अयशोभीरुणा जने।
यच्च ते वचनीयं स्यादपवादः समुत्थितः॥ **7.48.13** ॥

मया च परिहर्तव्यं त्वं हि मे परमा गतिः।
वक्तव्यश्चैव नृपतिर्धर्मेण सुसमाहितः॥ **7.48.14** ॥

यथा भ्रातृषु वर्तेथास्तथा पौरेषु नित्यदा।
परमो ह्येष धर्मस्ते तस्मात् कीर्तिरनुत्तमा॥ **7.48.15** ॥

यत्तु पौरजने राजन् धर्मेण समवाप्नुयात्।
अहं तु नानुशोचामि स्वशरीरं नरर्षभ॥ **7.48.16** ॥

यथापवादं पौराणां तथैव रघुनन्दन।
पतिर्हि देवता नार्याः पतिर्बन्धुः पतिर्गुरुः॥ **7.48.17** ॥

प्राणैरपि प्रियं तस्माद् भर्तुः कार्यं विशेषतः।
इति मद्वचनाद् रामो वक्तव्यो मम सङ्ग्रहः॥ **7.48.18** ॥

निरीक्ष्य माद्य गच्छ त्वमृतुकालातिवर्तिनीम्।
एवं ब्रुवन्त्यां सीतायां लक्ष्मणो दीनचेतनः॥ **7.48.19**॥

शिरसा वन्द्य धरणीं व्याहर्तुं न शशाक ह।
प्रदक्षिणं च तां कृत्वा रुदन्नेव महास्वनः॥ **7.48.20**॥

ध्यात्वा मुहूर्तं तामाह किं मां वक्ष्यसि शोभने।
दृष्टपूर्वं न ते रूपं पादौ दृष्टौ तवानघे॥ **7.48.21**॥

कथमत्र हि पश्यामि रामेण रहितां वने।
इत्युक्त्वा तां नमस्कृत्य पुनर्नावमुपारुहत्॥ **7.48.22**॥

आरुरोह पुनर्नावं नाविकं चाभ्यचोदयत्।
स गत्वा चोत्तरं तीरं शोकभारसमन्वितः॥ **7.48.23**॥

सम्मूढ इव दुःखेन रथमध्यारुहद् द्रुतम्।
मुहुर्मुहुः परावृत्य दृष्ट्वा सीतामनाथवत्॥ **7.48.24**॥

चेष्टन्तीं परतीरस्थां लक्ष्मणः प्रययावथ।
दूरस्थं रथमालोक्य लक्ष्मणं च मुहुर्मुहुः।
निरीक्ष्यमाणां तूद्विग्नां सीतां शोकः समाविशत्॥ **7.48.25**॥

सा दुःखभारावनता यशस्विनी
    यशोधरा नाथमपश्यती सती।
रुरोद सा बर्हिणनादिते वने
    महास्वनं दुःखपरायणा सती॥ **7.48.26**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टचत्वारिंशः सर्गः॥